# हरिवंशं – भविष्यपर्व

नीलकण्ठव्याख्यानसमेतं

अथ नवमोऽध्यायः

## एकार्णवविधिः

वैशंपायन उवाच

**भूत्वा नारायणो योगी सप्तमूर्तिर्विभावसुः ।**
**गभस्तिभिः प्रदीप्ताभिः संशोषयति सागरान् ॥ ३-९-१**

सर्वं दृश्यं विनाशीति ज्ञात्वा नाशविवर्जितम्
पदं नेतुं विनेयाति तृतीये योग उच्यते ॥ १ ॥

भूत्वेति । योगी नारायणः शुद्ध चिन्मात्र एव सन् विभावसुः वह्निरिवासङ्गोऽपि सप्तमूर्तिः महदहंकारपञ्चतन्मत्राशरीरो भूत्वा प्रदीप्ताभिः चैतन्योद्दीपिताभिर्गभस्तिभिरश्मिरूपाभि-स्तत्तदाकारवृत्तिभिः प्रकाशितान्सागरान् समुद्रवदनन्तान् रूपादीन् विषयान् संशोषयति स्वस्मिन् प्रविलापयति

**पीत्वाऽर्णवांश्च सर्वान्स नदीः कूपांश्च सर्वशः ।**
**पर्वतानां च सलिलं सर्वं पीत्वा च रश्मिभिः ॥ ३-९-२**

विराड्विलापनमुक्त्वा सूत्रात्मनस्तदाह - पीत्वेति । नदीकूपसदृशान् मानसान् कामान् संशोषयतीत्यनुषज्यते । तद्वत्पर्वतानां पर्वततुल्यानां कामक्रोधातीनां सलिलं सामर्थ्यं रश्मिभिः परिणामैः पीत्वा विलाप्यः ॥

**भित्त्वा सहस्रशश्चैव महीं नीत्वा रसातलम् ।**
**रसातलजलं कृत्स्नं पिबते रसमुत्तमम् ॥ ३-९-३**

एवं महीं स्थूलसूक्ष्मशरीरद्वयरूपां सहस्रशो भित्त्वा सर्वथा विलाप्य रसायास्तस्या एव तलमधिष्ठानकारणं ब्रह्म तत्प्रति तां नीत्वा तत्रत्यमपि जलं अपहतपाप्मत्वादिसंकल्पान्तं गुणजातं उत्तमं मानुषानन्दादिभ्य उत्कृष्टतमं पिबते संशोषयति ||

**अप्सु सृजन्क्लेदमन्यद्ददाति प्राणिनां ध्रुवम्**
**तत्सर्वमरविन्दाक्ष आदत्ते पुरुषोत्तमः ॥ ३-९-४**

अप्सु कारणे ब्रह्मणि स्थितं क्लेदं मनसो मृदुकरणं आनन्दं अन्यत् कार्यं सृजन् स्रक्ष्यन् प्राणिषु ध्रुवं ददाति | यत् सुखं कार्योपाधिषु निदधाति जीवनाय तदपि वृत्तिरूपत्वात्संहरतीत्यर्थः |तदेव स्पष्टीकरोति - तत्सर्वमिति ||

**वायुश्च बलवान्भूत्वा स विधूयाखिलं जगत् ।**
**प्राणोदयं सुराणां च वायुना कुरुते हरिः ॥ ३-९-५**

एवमुत्तमाधिकारिणां मनोमात्रसाधनं योगमभिधाय मध्यमानां वायुनिरोधपूर्वकं तमेवाह - वायुश्चेति | स योगी बलवान् मुलाधारादिसर्वचक्रभेदनसमर्थो भूत्वा अखिलं जगद्पादादि-जानुपर्यन्तं भूस्थानमित्यादिना तन्त्रोक्तदिशा भावनया स्वशरीरमात्रीकृतं विधूय अधोध-स्तनस्य उपर्युपरितने प्रविलापनप्रकारेण निरस्य | प्राणोदयं प्राणानां पञ्चानां सुराणा-मिन्द्रियाणां च उदयं उत् ऊर्ध्वं सहस्रारे भ्रूमध्ये वा अपनयनं गमनं हरिर्योगी वायुना विजितेन कुरुते एतदेव विस्तरेणाह - तत इत्यादिना | देवगणानां च संघर्षजः पावकः

निखिलान् लोकानदहदिति षष्टेनान्वयः । ततो योगप्रवृत्त्यनन्तरं देवानामग्न्यादीनां च देहिनां जीवान्तराणाम् । एतेन मदन्यो मुमुक्षुर्नास्तीत्यपि योगिना चिन्तनीयम् । अन्यथा भेदस्याविलयान्मुक्त्यसिद्ध्यापत्ति स्यात् ।

**ततो देवगणानां च सर्वेषामेव देहिनाम्**
**ये चेन्द्रियगणाः सर्वे ये चान्ये च यतोद्भवाः ॥ ३-९-६**

ये चान्ये चेति । यतोद्भवाः यत इन्द्रियाद्येषां विषयाणामुद्भवास्ते यतोद्भवाः सन्धिरार्षः । तान्येवेन्द्रियाणि तदुद्भुतांश्चाह पूयमिति । पूयं गन्धाख्यो विषयः । रसादिसाहचर्यात् घ्राणमिन्द्रियं शरीरं स्थूलं च एते गुणाः गुणकार्यभूताः प्रिथिवीमाश्रिताः ।

**पूयं घ्राणं शरीरं च पृथिवीमाश्रिता गुणाः ।**
**जिह्वा रसश्च क्लेदश्च संश्रिताः सलिलं गुणाः ।**
**रूपं चक्षुर्विपाकश्च ज्योतिरेवाश्रिता गुणाः ॥ ३-९-७**

रसश्चार्द्रः रसनेन्द्रियं क्लेदः पृथिव्यवयवान्तः प्रवेशेन तस्याः शिथिलीकरणम् । विपाको विकृतिः ओदनादि - रूपा ।

**स्पर्शः प्राणश्च चेष्टा च पवनं संश्रिता गुणाः ।**
**परमेष्ठिनं वरेण्यं च हृषीकेशं समाश्रिताः ॥ ३-९-८**

शब्दः श्रोत्रं छिद्रदानं चाकाशं संश्रिता गुणाः इत्यपि
द्रष्टव्यम् । त एते सर्वेऽपि परमेष्टिनं सुत्रात्मानं वरेण्यम् अवश्यम् । उपास्यतया वरणीयं हृषीकेशं हृषीकाणामिन्द्रियाणाम् ईशितारं सम्यगाश्रिताः ॥

**ततो भगवता तत्र रश्मिभिः परिवारिताः ।**
**वायुना कृष्यमाणाश्च रूपान्योन्यसमाश्रयात् ॥ ३-९-९**

ततस्तं संप्राप्य भगवतान्तर्यामिणा कर्त्रा तत्र सूत्रे मिलिताः | संतः रश्मिभिः सूक्ष्माभिर्वृत्तिभिः परिवारिताश्चैते देवगणेन्द्रियगणादयः वायुना करणेन कृष्णमाणाः | रूपेति लुप्तशेषं पदम् | रूपादय अन्योन्यस्य एकीभावेनाश्रयात् ||

**तेषां संघर्षजोद्भूतः पावकः शतधा ज्वलन् ।**
**अदहन्निखिलाँल्लोकानुग्रः संवर्तकोऽनलः ॥ ३-९-१०**

तेषां रूपादीनां संघर्षजश्चासौ उद्भूतश्च यः पावको जगत्कारणाद्वैतवस्तुप्रकशाग्निर्निखिलाँल्लोकान् तत्तत्कर्मफलभूतानदहत् कर्मणामेव दाहत् ||

**सपर्वतांस्तरून्गुल्माँल्लतावल्लीस्तृणानि च ।**
**विमानानि च दिव्यानि पुराणि विविधानि च ॥ ३-९-११**

स्वरूपेणापि लोकदाहमाह - सपर्वतानित्यादिना ||

**आश्रमांश्च तथा पुण्यान् दिव्यान्यायतनानि च ।**
**यानि चाश्रयणीयानि तानि सर्वाणि सोऽदहत् ॥ ३-९-१२**

आश्रयणीयानि दहराद्युपास्यरूपाणि सर्वेषां मनोमात्रत्वात्तद्दाहेन दाह इति भावः —

*असतोऽधिमनोऽसृजत मनः प्रजापतिमसृजत प्रजापतिः प्रजा असृजत तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किंच*
इति श्रुतेः

**भस्मीभूतांस्ततः सर्वाँल्लोकाँल्लोकगुरुर्हरिः ।**
**भूयो निर्वापयामास जलयुक्तेन कर्मणा ॥ ३-९-१३**

एवं समाधौ सकारणस्य कार्यस्य प्रलयमुक्त्वा व्यूत्थाने तदुत्पत्तिमाह चतुर्भिः - भस्मीभूतानित्यादिभिः हरिर्योगी निर्व्यापयामास भोक्त्रे भोग्यं कल्पितवान् | केन कर्मणा भोगायारब्धेन सञ्चितक्रियमाणयोर्दाहश्लेषस्य तदधिगम उत्तरपूर्वादययोश्लेषाविति न्याय-सिद्धत्वात् | जलयुक्तेन कारणीभूताविद्यासंस्कारशेषेण | भूयश्चान्ते विश्वमायानिवृत्तिरिति ज्ञानेऽपि यावद्देहपातं मायालेशानुवृत्तेर्दर्शनात् ||

**सहस्रदृङ्महातेजा भूत्वा कृष्णो महाघनः ।**
**दिव्यतोयेन हविषा तर्पयामास मेदिनीम् ॥ ३-९-१४**

विषयभेदात्सहस्रं दृष्टयो यस्य स सहस्रदृक् महतेजाः परंज्योतिरूपः कृष्णः कर्षकः संहर्ता भूत्वा महाघन इव जगदङ्कुरस्रष्टाऽपि भवति | तदेवाह - दिव्येन तोयेन चिच्चन्द्रमण्डलात्प्रसृतेन भावनामृतेन हविषा विशुद्धेन तर्पयामास | मेदिनीं शरीरम् | व्यूत्थाने आदौ शरीरं चेतनया व्याप्तमित्यर्थः |

**ततः क्षीरनिकाशेन स्वादुना परमाम्भसा ।**
**शिवेन पुण्येन मही निर्वाणमगमत्परम् ॥ ३-९-१५**

क्षीर सत्यम् स्वच्छत्वात् तन्निकाशेन चित्तसत्त्वाकारेण परमाम्भसा चैतन्यामृतेन

महीशरीरद्वयं निर्वाण शान्तिम् अगमत् | योगिनो हि स्थूलशरीरं निर्वाति |
*न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्*
इति श्रुते | सूक्ष्ममपि निर्वाति ।
*तत्र को मोहः कः शोकः एकत्वमनुपश्यतः*
इति श्रुतेश्च ||

ते नगा जलसंछन्नाः पयसः सर्वतोधराः ।
एकार्णवजला भूत्वा सर्वसत्त्वविवर्जिताः ॥ ३-९-१६

अस्य दृष्ट्या बाह्यमपि सर्वं चिन्मात्रमेवेत्याह - ते नगा इति | ये पूर्वं परमार्थत्वेन गृहीतास्ते नगाः पर्वतवृक्षादयः जलसंछन्नाश्चितावगुण्ठिताः | किं च सर्वतोऽन्तर्बहिश्च पयः साश्चित एव धराः धर्तारः सैन्धववनवच्चिद्घना एवेत्यर्थः तदेवाह - एकार्णवजला भूत्वेति | अत एव सर्वसत्त्वविवर्जिताः सर्वस्य वियदादे सत्त्वं सता तद्रहिताः ब्रह्मसत्तैव सर्वत्रानुस्यूता न वियदादिषु पृथग्सत्ताऽस्तीत्यर्थः || जगत्पश्यन्नपि द्विचन्द्रवद्बाधितत्वेनैव पश्यतीति भावः |

**महाभूतान्यपि च तं प्रविष्टान्यमितौजसम् ।**
**नष्टार्कपवनाकाशे सूक्ष्मे जनविवर्जिते ॥ ३-९-१७**

योगस्य मुख्यं फलम् शुद्धात्मदर्शनमाह त्रिभिः | महाभूतानीति | तं योगिनं सूक्ष्मे शुद्धे वस्तुनि स्थितमिति शेषः | कीदृशे सूक्ष्मे नष्टा अदर्शनं गता अर्कादयो यस्मिन्नष्टार्कपवनाकाशे | अत एव महाभूतानि तं प्रविष्टानि तत्रैव लीनानीत्यर्थः | | किमपीति वाङ्मनसाति तत्वं सूचितम् ||

**संशोषयित्वा पीत्वा च** [ कल्पयित्वाच देहिनम् ।
दग्ध्वा सन्तापयित्वा च ] वसत्येकः सनातनः ।
पौराणं रूपमास्थाय किमप्यमितबुद्धिमान् ॥३-९-१८

एवमुक्तप्रकारेण संशोषयित्वा विषयेषु प्रविभक्तं प्रज्ञानं प्रत्याहृत्य पीत्वा निर्विशेषे प्रविलाप्य

**एकार्णवजले ह्यासीत् योगी योगमुपागतः ।**
**अयुतानां सहस्राणि गतान्येकार्णवोऽम्भसि ।**
**न चैनं कश्चिदव्यक्तं व्यक्तं वेदितुमर्हति ॥ ३-९-१९**

तदेवाह - एकार्णवेति | योगं दुःखसंयोगवियोगम् उपागत प्राप्त अयुतानाम् अपृथग्भूतानां रज्ज्वादिभ्य इवोरगादीनां आत्मन्यध्यस्तानां वियदादीनां सहस्राणि वृत्तिभेदादनन्तादि एकार्णवेऽम्भसि शुद्धे ब्रह्मणि गतानि प्राप्तानि विलीनानित्यर्थः | नायं मृदि घटस्येव निवृत्तिरूपो लयः | किं तु रज्ज्वामहेरिवेति भावः | न चैनमिति व्यक्तमिति क्रियाविशेषणम् बुद्धिवृत्तेरपि लीनत्वादेनं प्रत्यञ्च न कश्चिज्ज्ञानातीत्यर्थः |

जनमेजय उवाच

**एकार्णवविधिः कोऽयं यश्चैव परिकीर्तितः ।**
**क एष पुरुषो नाम किंयोगः कश्च योगवान् ॥ ३-९-२०**

संक्षेपेण श्रुतं योगं विस्तरेण श्रोतुमिच्छूर्जनमेजय उवाच - एकार्णव विधिरिति | विधिरवधिः दैनंदिनादिप्रलयवदात्यन्तिकप्रलायस्यापि कश्चिद्कालावधिरस्तीति प्रश्नः | सति तस्मिन्

स्वत एव कैवल्यं सेत्स्यति किं साधनानुष्टानैः संशोषदाहपनादिभिरिति भावः । य एष इति पूर्वोक्तं ज्ञानसाध्यं प्रलयं परामृशति । नप्राकृतम् दैनंदिनं वा एक एव पुरुष एकार्णवो नाम । किं योगः किं रूपोयं योगो जतुकाष्टवत् सलिलसैन्धवखिल्यवद्रज्जूरगवद्वा । कश्च योगवान् जीवः ॥ संबन्धिनः संबन्धस्य च योगाख्यस किं स्वरूपमिति प्रश्नत्रयं पूर्वेण सह चतुष्टयम् ।

वैशम्पायन उवाच

**एतावन्तमसौ कालमेकार्णवविधिं प्रति ।**
**करिष्यतीमं भगवानिति कश्चिन्न बुध्यते ॥ ३-९-२१**

क्रमेणोत्तराणि वैशम्पायन उवाच - एतावन्तमिति । इमम् एकार्णवविधिम् एकार्णवनियतिम् एतावन्तं कालं प्रति प्रतीक्ष्य करिष्यति भगवानिति कश्चिन्न बुध्यते । इतरवज्ज्ञानैकसाध्यस्य महाप्रलयस्य कालविधिर्नास्त्यतः साधनमनुष्टेयमेवेत्यर्थः ।

**न वै माता न च द्रष्टा न ज्ञाता नैव पार्श्वगः ।**
**ततोऽवज्ञायते कश्चिदृते तं देवमीश्वरम् ॥ ३-९-२२**

एक एव पुरुषो नामेत्यस्योत्तरमाह । न माता प्रमाता अहंकारशून्यत्वात् साक्ष्यभावाच्च । न द्रष्टा साक्षी वृतेरपि विलयान्न ज्ञाता चरमान्तःकरणावृत्त्या ब्रह्मविद्याख्यया प्रत्यञ्चं विषयीकुर्वन् । अत एव न पार्श्वगो न तटस्यः प्रत्यगात्मरूपत्वात् । किं रूपो योग इत्यस्योत्तरमह - तत इति । ततस्तस्यामवस्थायां यथा जतुकाष्टसंयोगेषु त्रयमिति पृथग्दृश्यते यथ वा जलसैन्धवरसौ एकलोलीभूतौ पृथक्त्वेनानुमीयेते तथा न तत्र तमृतेऽन्यत् ज्ञायते रज्ज्वामिव सर्पबोधतदतिरिक्तमित्यर्थः ॥

नभः क्षितिं पवनमथ प्रकाशयन्
प्रजापतिं भुवनचरं सुरेश्वरम् ।
पितामहं श्रुतिनिलयं महामुनिं
शशास भूः शयनमरोचयत्प्रभुः ॥ ३-९-२३

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि पुष्करप्रादुर्भावे नवमोऽध्यायः ॥

कश्च योगवानित्यस्योत्तरमाह - नम इति || यः प्रभुर्महामुनिं शशास स शयनमरोचयदिति यत्तदोरध्याहारेण योज्यं | नम आदिरूपं देहेन्द्रियादिसंघातं प्रकाशयन् त्स्वचैत्यनेन व्याप्नुवन् तत एव व्यापनोद्धेतोः प्रजापतिं प्रजायत इति प्रजा उपाधिस्तस्याः पतिम् अध्यक्षत्वाभिमानिनं भुवनचरं चक्षुरादिद्वारा सुरेश्वरं इन्द्रियाणां प्रवृत्ति निवृत्त्योः स्वतन्त्रं एवम्विधं जीवं सन्तं वस्तुवृत्तेन पितामहं कार्यस्य पिता कारणं तस्य पिता शुद्धचैतन्यं अत एव श्रुतिनिलयं श्रुत्येकगम्यमपि महामुनिं मुमुक्षुजीवरूपेण महन्तं मननशीलं शशास | शसु हिंसायाम् | स्वस्वरूपे प्रविलापितवान् यः स भूः भवत्यस्मादिति भूः ईशः शयनं ईशतानिरोधम् अरोचयत् | शुद्ध एवोपाध्यभिमानाद्बद्धः सन्योगवान्योद्याधिकारी भवतीत्यर्थः ||
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि टीकायां नवमोऽध्यायः ॥

Harivamsha Maha Puranam - Part 3 - Bhavishya Parva
Itranslated by G. Schaufelberger, schaufel@wanadoo.fr August 22, 2008

Proof-read by K. S. Rmachandran, ramachandran_ksr@yahoo.ca
Electronic version with Nilakantha commentary prepared by A. Purushothaman, purushu55@gmail.com

Devanagari version prepared using latex-sanskrit package of Charles Wikner

If you find any errors compared to Chitrashala Press edition, send corrections to A. Harindranath, harindranath_a@yahoo.com